वियोज्य / ***DETACHABLE***

# SANSKRIT

## COMPULSORY

*Time Allowed : Three Hours*

*Maximum Marks : 300*

### QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions.**

All questions are to be attempted.

The number of marks carried by a question is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the answer book must be clearly struck off.

Attempts of questions shall be counted in chronological order. Unless struck off, attempt of a question shall be counted even if attempted partly.

1. अधस्ताद् दत्तं विषयद्वयमधिकृत्य प्रत्येकशः **शब्दानां शतत्रयेण** संक्षिप्तं निबन्धद्वयं विरच्यताम् ।

50×2=100

1.(a) कर्मसु जीवामो वयं, न वर्षेषु ।

1.(b) यथाकालं न्यायं विना कोऽपि समाजो न सुरक्षितः ।

2. अधस्तनं गद्यांशं सावधानं पठित्वा तदुपरिष्टाद् दत्तानां प्रश्नानामुत्तरं स्पष्टतया, साधु, संक्षेपेण च करणीयम् ।

6×10=60

प्रशासकानां कृते पत्रकाराणां मतभेदः स्वस्तिकारणम्; अस्यार्थः, यैः स्वैरैरनेनोच्यते तेषां बहुत्वेन वार्तामाध्यमस्य शक्तिः क्षीणायते । वार्तापत्रस्य यथार्थं प्रभावमानं न तीक्ष्णतमेन कण्ठेन न वा उद्दिष्टानां श्रोतॄणां परिमानेन लभ्यते । वार्तापत्रस्य शक्तिर्मायावस्तु इति, नैषा तेषां हस्तगता ये वार्तापत्रविक्रयद्वारेण प्रभूतं धनार्जनं कुर्वन्ति, न च तेषां ये भूयिष्ठप्रचारसाधने सफलीभवन्ति ।

प्रचारो नाम जनताया अर्पिता श्रद्धाञ्जलिः वार्तापत्राणि प्रति, यानि तस्या दौर्बल्यजातं प्रति सानुकम्पं वर्तन्ते, तस्या गौरवजातं च तोषयन्ति । चलच्चित्राणां प्रेक्षापेटकतुल्यमेतत् । येभ्यस्तानि प्रदर्शितानि, तेषां चरित्रबाहुल्यानुसारेण चलच्चित्राणामाकर्षणशक्तिर्विभिन्ना भवति । चलच्चित्राणां वाणिज्यिकं साफल्यं तेषां कलानैपुण्योपकरणोत्कर्षात् सुतरां भिन्नं भवति । उत्तमकलावधारणे येनोपकरणेन प्रयोजनं तन्न जनसंमर्दे उपलब्धम् । तदेका प्राप्तिर्यस्या अधिकारः केवलं कतिषु 'विशिष्टेषु' वर्तते, येषां संख्या अल्पीयसी । तत्र विरोधो भवति अल्पीयसां प्रतिभावतां विशिष्टया सूक्ष्मकलया सह अशिष्टानां बहूनां बोधसामर्थ्यस्य विनोदनस्य च । इतरेषां समुन्नतिः यथा वार्तापत्राणां तथा चलच्चित्राणामपि शैक्षिकोद्योगस्य मूलमिति । उभयोरेव प्रयाससाम्यमस्ति । वर्जनीयाः कामचारा अपि समाना एव ।

2.(i) किं द्रव्यद्वयं ग्रन्थकारेण उपमीयते ?

2.(ii) जनतां प्रति सानुकम्पानि वार्तापत्राणि प्रति तस्याः कीदृशी प्रतिक्रिया ?

2.(iii) किम् 'उपकरणं' ग्रन्थकारेणोल्लिख्यते ?

2.(iv) ग्रन्थकारमते वार्तापत्राणाम् उद्योगमूलं किं भवेत् ?

2.(v) कान् जनान् प्रति ग्रन्थकारस्य सम्मतिर्नास्ति ?

2.(vi) कानि कार्याणि कस्यचन वार्तापत्रस्य गुणमानविषये भ्रमं जनयन्ति ?

3. अधस्तनगद्यांशस्य संक्षेपः मूलभागस्य तृतीयांश एव लेख्यः। निर्धारितशब्दसंख्यामध्ये लेखने व्यर्थता अङ्कक्षतिकारिणी। 60

सांप्रतिके विश्वे जातिरिति जातिराष्ट्रमिति च विषय-द्वयमधिकृत्य भूयान् संशयो वर्तते। जातिराष्ट्राणां लक्षणविधानं प्रायः सुकरम्; विश्वराजनीति-संघे मौलिकानि अङ्गानि तानि। प्रायेण तानि सार्वभौमराष्ट्रपर्यायाणि; राष्ट्रसंघे तेषामङ्गानां स्थानमस्ति; सामान्येन आङ्गलभाषायाम् एतानि देशा इति (कान्ट्रि) कथ्यन्ते। यदि वयं तानि केवलं राष्ट्राणि इति कथयेम तदा सुकरं स्यात्, परं जातिराष्ट्रेषु कुत्रचित् अनेन अभिधानेन देशस्य क्षुद्रतरा भागा निर्दिश्यन्ते इति खेदः।

जातिराष्ट्रं सार्वभौमराष्ट्रस्य पर्यायवचनमिति चिन्तने दुराग्रहः संभवति, परं तद् भ्रमात्मकम्, यतः आधुनिके विश्वे सार्वभौमत्वमतीव दोर्बल्यग्रस्तम्। वस्तुतः सर्वाणि जातिराष्ट्राणि आन्तर्जातिकसंघेषु स्वकीयं सार्वभौमत्वं कथंचित् समर्प्य राजन्ते; परं यद् वा भवतु, एते संघाः – राष्ट्रसंघ इति समुत्कृष्टमुदाहरणमत्र – तेभ्यो जातिराष्ट्रेभ्य आत्मीयं कर्तृत्वम् आददते, न त्वत्र विपरीतक्रमः।

राष्ट्रेषु परस्परव्यवहारे शक्तिसंबन्धस्य संमतेश्च जटिलं वैचित्र्यं लक्ष्यते। एककोटिकतया एभिः कतिभ्यः राष्ट्रेभ्यः विपुलं प्रभुत्वं दीयते। विपरीतकोटिमार्गे बहूनि क्षुद्राणि राष्ट्राणि स्पष्टतः शक्तिधराणां पार्श्ववर्तिनां राष्ट्राणाम् अथवा आन्तर्जातिकसंघानां कुक्षिगतानि। वस्तुतः बहुषु विषयेषु तेषां स्वतन्त्रं कर्तृत्वं प्रायेण अवकाशहीनमेव भवति।

भूयिष्ठानि जातिराष्ट्राणि आत्मनो 'जातयः' इति वदन्ति, अतः कथं न वयं तांस्तथैव अवगच्छामः, वदामश्च जातिराष्ट्राणि जातयश्च अभिन्ना एवेति ? एतत्तु न संभवति, यतस्ते भिन्नार्थद्योतकाः; जातिराष्ट्रमिति विधिप्रदत्तं लक्षणम्, जातिरिति जनसमुदायः। यद्यपि आत्मनां जातिसत्तां प्रकटीकुर्वाणा आधुनिका जनसमुदाया जातिराष्ट्रं प्रेप्सन्ति जातिपर्यायवचनमिव, स्वकीयं जातिराष्ट्रं शासितुं जातेर्लक्षणं तु अतीव संकीर्णम्; भूयिष्ठा व्याख्यातारः संमताः स्युः भूतपूर्वस्य सोवियेत्-युनियनस्य अधिकांशाः प्रजातन्त्रगताः जनसमुदायाः, यथा जर्जियानाः, लिथुयानीयानाः, युक्रैनियाना इति स्वातन्त्र्यार्जनात् प्राक् जातय आसन् इति; तथा च सुनिर्दिष्टदेशभागविशिष्टाः स्कट्ल्यान्ड्-प्रभृतयः सन्ति; अनेके मन्यन्ते तेषां जातिसत्ता अस्ति, तस्याः प्रत्यभिज्ञानं कर्तव्यमिति। अन्यथा वक्तुं शक्यते स्वाधीन-कतृत्वस्य अभीप्सा समुचिता। यद्यपि यदाधुनिकं जातिराष्ट्रमिति, आपाततः तत्तुल्यं राष्ट्रं शासनं च सुप्राचीनं लक्ष्यते अब्दसहस्राणां पूर्वं चीनदेशे, भारते वर्षे, भूमध्यसागरीयभूभागे; एते सुप्राचीनाः संघा वस्तुतः कस्यचन प्रभोः शासनाधीना भूभागा आसन्। एते प्राचीनाः शासनप्रकाराः आधुनिकानि जातिराष्ट्राणि संभूतानि, प्रायः शनैः शनैः, तेषां चिह्नानि तु सबलमुपस्थितानि आधुनिके कालेऽपि; अस्ट्रो-हाङ्गेरीयं, रुशं तथा ओटोमान् इति साम्राज्यानि 1917/1918 वर्षं यावत् चलितानि, एतानि स्पष्टतः वंशाधिकार-साम्राज्यानि यत्र जनसमुदायस्य जातिसत्ताबोधो नासीत्; तथा च सोवियेत्-युनियनः, यत्र रुश्-साम्राज्यस्य बहवो धाराः चलिताः 1991 वर्षं यावत्, संविधानबलेनैव अनेकजातीनाम् ऐक्यसाधकं राष्ट्रमासीत्। अद्यापि अनेकानि उदाहरणानि दृश्यन्ते यत्र जातिराष्ट्राणि जातयश्च सारल्येन न समापतन्ति। यथा जातिराष्ट्राणां प्रायेण सर्वेषां सर्वकाराः स्वीयं शासनसमाजं जातिनाम्ना वर्णयन्ति, बहूनां राष्ट्राणां जनसमुदायः राष्ट्रप्रदत्तं जातिपरिचयं न

स्वीकुर्वन्ति; ब्रिटेन्देशे स्कट्देशीयाः, ओयेल्श्-प्रान्तीयाश्च आत्मनो न तथा ब्रिटिश्-जातीया मन्यन्ते, यथा स्कट् इति ओयेल्श् इति चानुभवन्ति; अथवा तेषामस्ति युगपत् स्कटिश्-ब्रिटिश् इति, ओयेल्श्-ब्रिटिश् इति वा जातिसत्ता । आरवीयदेशेषु बहवो जनाः अनुभवन्ति तेषां जातिसत्ता आरवी इति, न च अपरा कापि, या केनापि आरवीय-राष्ट्रेण दत्ता, इराकतो, मरक्कतो, दक्षिण-इयेमेनतोऽथवा तथा ।

अनेकेषां जनानां कृते (अजातिसंबन्धिनी) जनगोष्ठी-सत्ता तथा महती यदनया (राष्ट्रनिर्दिष्टः) जातिपरिचयः तथा दुर्बलीक्रियते यथा वस्तुतो नगण्य एव; वयमत्रोदाहरणरूपेण प्रथमः आमेरिकानः अथवा आफ्रिकानः इत्यस्य जनगोष्ठीदलस्य (जनजातेः) सदस्यानाम् उल्लेखं करवाम ।

यद्यपि जातिराष्ट्राणि जातयश्च न अभिन्नाः, तथापि ते अवश्यं नैकट्येन संबद्धाः । एन्टनि स्मिथ् (द्रष्टव्यम् स्मिथ् 1991) जातीः विभक्ताः कोरोति – एकाः याः मुख्यतः जनगोष्ठीदलेभ्यः संजाताः, ततः परिमार्जिताः प्रसारिताश्च तेषां जनगोष्ठीपरिचयविशेषाः, यथा बृहत्तरस्य जनसमुदायस्य ग्रहणं स्यादिति; अपराः याः राष्ट्रविशेषाणाम् अभ्यन्तरमेव संजाताः, यत्र जातिपरिचयस्य सामान्योऽनुभवः राष्ट्रमध्ये समुत्थितः, येन भूतपूर्वः विविधः जनसमूदायः अन्तर्भूतः स्यादिति । (Total words – 423)

4. Translate the following passage into Sanskrit : 20

Raman completed school when he was just eleven years old and spent two years studying in his father's college. When he was only thirteen years old, he went to Madras (which is now Chennai), to join the B.A. course at Presidency College. Besides being young for his class, Raman was also quite unimpressive in appearance and recalls, '......in the first English class that I attended, Professor E. H. Elliot addressing me, asked if I really belonged to the junior B.A. class, and I had to answer him in the affirmative'. He, however, stunned all the sceptics when he stood first in the B.A. examinations.

Seeing what a brilliant student he was, his teachers asked him to prepare for the Indian Civil Services (ICS) examination. It was a very prestigious examination and very rarely did non-Britishers get through it. Yet Raman had impressed his teachers so much that they urged him to take it up at such an early age. In spite of their student's brilliance, the plan was not to work. Raman had to undergo a medical examination before he could qualify to take the ICS test and the Civil Surgeon of Madras declared him medically unfit to travel to England ! This was the only examination that Raman failed, and he would later remark in his characteristic style about the man who disqualified him, 'I shall ever be grateful to this man, but at that time, he simply put the attempt behind him and went on to study Physics.

5. अधःस्थगद्यभागस्य आङ्गलभाषानुवादः कर्तव्यः । 20

क्रयमाध्यमरूपेण हस्ताद् हस्तान्तरं शीघ्रं द्रवत् यत् किमपि अर्थस्य लक्षणं भवितुमर्हति । अस्य व्यवहारो द्रव्यविनिमयव्यवस्थायाः स्थानमधिकरोति, यत्र बहुधा संकटः, यतः विनिमयद्रव्याणां मूल्यानां समीकरणे, तथा यदन्यो दातुमिच्छति तत्स्वीकारे विनिमयकारिणः संमतिदाने च कष्टम् । विनिमयं सुकरं विधाय अर्थः श्रमनैपुण्यं श्रमविभाजनं च साधयति, ये द्वे भूरिक्रमोत्पादनस्य मूलमार्ग इति । अर्थस्योपादानं किमपि द्रव्यं भवति, अथवा तस्याकारो विधिसंमतः प्रथासंमतो वा कोऽपि स्यात्; परं तस्यानिवार्यं वैशिष्ट्यं स्यात् शीघ्रं व्यापकतया च ग्रहणम् । आदिमगोष्ठीषु गवादि-शुक्तिका-तण्डुल-चाय-प्रभृतीनि द्रव्याणि व्यवह्रियन्ते स्म; किं तु आधुनिकानि सुसभ्यानि राष्ट्राणि अव्यतिरेकेण धातुं कागदपत्रं वा व्यवहरन्ति । एतत्सर्वं मुद्रारूपेण नोट्रूपेण वा अर्थद्रव्ये अभीष्टान् भूयिष्ठान गुणान् धारयति, यथा वाह्यतां, स्थायित्वं, गुणसाम्यं, ग्राह्यतां च । मुख्यतया व्यवहृता धातवो नाम सुवर्णं, रजतं, ताम्रं, रङ्गं च । नोट्जातं बहून् प्रकारान् आश्रित्य प्रयुक्तं भवति ।

विनिमयमाध्यमकार्यमतिरिच्य अर्थः मूल्यपरिमाणं चाभूत्; तेन मूल्यानां तुलना संभाविता येन मानकेन ऋणादिप्रत्यर्पणस्य परिमापणं संभवति, मूल्यसंभारश्च। मानकोऽर्थः प्रतीकोऽर्थश्चेत्यनयोर्महदन्तरम्। आद्यस्योपादानं मानकं मूल्यं, अर्थात् किमपि द्रव्यं, येन सह अन्यानि द्रव्याणि तुल्यन्ते तेषां मूल्यं निर्धारयितुम्। मानकस्यार्थस्य मूल्यं तस्य उपादानेन निर्णीयते; परं प्रतीकोऽर्थो, यथा नोट्-विषये लक्षणीयम्, – विधिनिर्दिष्टं प्रथाप्राप्तं वा मूल्यं गृह्णाति स्वकीयं स्वरूपमूल्यमुपेक्ष्य।

6.(a) अधोलिखितपदानां स्वरचितवाक्येषु प्रयोगः कार्यः। 2×5=10

6.(a)(i) पुनः

6.(a)(ii) हि

6.(a)(iii) चिरम्

6.(a)(iv) यथा

6.(a)(v) एव

6.(b) पदसाधनं क्रियताम्। 1×10=10

6.(b)(i) अस्मद् + षष्ठी, एकवचनम्।

6.(b)(ii) गिरि + तृतीया, एकवचनम्।

6.(b)(iii) वचस् + तृतीया, एकवचनम्।

6.(b)(iv) देवी + चतुर्थी, एकवचनम्।

6.(b)(v) सखी + प्रथमा, एकवचनम्।

6.(b)(vi) हन् + लोट् हि।

6.(b)(vii) सेव् + लट्, मध्यमपुरुषे एकवचनम्।

6.(b)(viii) मृ + लृट्, प्रथमपुरुषे बहुवचनम्।

6.(b)(ix) अस् + लङ्, प्रथमपुरुषे एकवचनम्।

6.(b)(x) गम् + लिट्, प्रथमपुरुषे एकवचनम्।

6.(c) समासो विधेयः, समासनाम च लेखनीयम्। 2×5=10

6.(c)(i) दण्डः पाणौ यस्य सः।

6.(c)(ii) व्याघ्रेण हतः।

6.(c)(iii) मेघ इव श्यामः।

6.(c)(iv) नीलश्चासौ लोहितश्च।

6.(c)(v) पाणी च पादौ च।

6.(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि। 2×5=10

6.(d)(i) मे अर्थस्य प्रयोजनं नास्ति।

6.(d)(ii) गृहस्य परितः उद्यानः विद्यते।

6.(d)(iii) सवेगेन धावति अश्वाः।

6.(d)(iv) दरिद्रम् वस्त्रं ददाति अहम्।

6.(d)(v) सर्पस्य बिभ्यति बालकः।

---